भागिकः द्विभागो गंधकः सूतस्त्रिभागो मर्दयेद्दिनं कपित्थस्वरसे गाढं मृगशृंगे ततः क्षिपेत् पुटेमध्यपु मंजरी
टेनैव ततउद्धृत्य समर्दयेत् बलारसैः सप्तवेलमपामार्गरसैस्तथा लोध्रप्रतिविषामुस्ताधातकीइंद्रवा
रुणाः प्रत्येकमेतत्स्वरसैर्भावनास्यात्त्रिधा त्रिधा माषमात्ररसोदेयो मधुनामरिचैस्तथा हंत्यासर्वानतीसा
॥१८॥ रान् ग्रहणीसर्वजामपि कपाटोग्रहणीरोगे रसोयं वह्निदीपनः इतिग्रहणीवज्रकपाटोरसः ॥ सूतकं
गंधकं लोहं विषं चित्रकपत्रकं विडंगारेणुकामुस्ता मेलासेके ग्रंथिकं कटुत्रयं च त्रिफला शुल्वभस्म
तथैव च एतानि समभागानि द्विगुणो गुड उच्यते कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे शूले ताभ्यां ग्रह
णीमांद्य श्लेष्मामये तथा हस्तपादादिरोगेषु गुटिकेयं प्रशस्यते रसांगो विदितश्चायं रसो विजयभै
रवः ॥ इति विजयभैरवरसः ॥ तंडुलीयजलैः पिष्टं सूततुल्यं च गंधकं वज्रमूषां तु तं पाच्यं भूधरे भस्मतांनये
त् दशमूलकषायेण। भावयेत्प्रहरद्वयं गुंजाद्वयं ददेत्तस्य हिक्काश्वासज्वरं किल। अनुपाने नदातव्योर
ड सोयं मेघडंबरः ॥ इति मेघडंबररसः ॥ गंधकाष्टगुणं सूतं शुद्धं मृद्वग्निना क्षणात् पक्त्वावतार्य संचूर्ण्य
चूर्णतुल्यान्मरिचतः सप्तगुंजामितं खादेद्वर्द्धयेच्च दिने दिने गुंजैकैक क्रमेणैव यावत्स्यादेकविंशतिः श्री
राज्यशर्कराः सार्द्धं शाल्यन्नं पथ्यमाचरेत् कंपवातप्रशांत्यर्थं निर्वाते निवसेत्सदा त्रिगुणाख्यो रसो ना
म्ना त्रिपक्षात्कंपवातनुत् इतित्रिगुणाख्योरसः ॥ सूतं हाटक वज्राणि ताम्रं लोहं च माक्षिकं तालं नीलां

जनंतुल्यमहिफेनसमांशकं पंचानांवातलवणानांच भागमेकंविमर्दयेत् वज्रीक्षीरैर्दिनैकंतुरुध्वाथो
भूधरेपचेत् माषैकमार्द्रकद्रावैर्लेहयेद्वातनाशनं पिप्पलीमूलकंक्वाथंसगुडमनुपानमेत् सर्वान्वातवि
कारांश्चनिहंत्याक्षेपकादिकान् रसःसर्वत्रविख्यातोनाम्नावातरिपुस्मृतः इतिवातनाशनोरसः॥ मृतंसू
तंघृतंलोहंगंधतालकमाक्षिकं पथ्याशृंगीविषंत्र्यूषमग्निमंथंचटंकणं तुल्यंखल्वेदिनंमर्द्यंभृंगीनिर्गुं
डिजैर्द्रवैः द्विगुंजावटिकांखादेत्सर्ववातप्रशांतये साध्यासाध्यंनिहंत्याशुरसोवातगजांकुशः इतिगजां
वात
कुशोरसः॥ मृतसूतार्कलोहानितुल्यापथ्याचचूर्णयेत् माषमात्रंलिहेत्क्षौद्रैः रसपित्तप्रशांतये
अम्लपित्तांतकोनाम रसोभैरवनिर्मितः इतिअम्लपित्तांतकोरसः॥ रसोबलिर्व्योमरविस्तुल्योलंथात्र
ह्नीरैस्त्रिदिनंविमर्द्यः तदन्वमृष्टंमृदुमार्कवेन समर्दयेहस्तचवल्लयुग्मं॥ हृत्सम्लपित्तमधुनास्क्तली
ढं लीलाविलासोरसराजएषः॥ इतिलीलाविलासोरसः॥ मृतसूतंमृतंताम्रंहिंगुपुष्करमूलकं सैंधवंगंध
कंतालकंकटुकंचूर्णयेत्समं पुनर्नवादेवदालीविषमुष्टीतंदुलीयकैः तिक्तकोशातकीद्रावैर्दिनैकंमर्दयेद्दृढं
माषमात्रंलिहेत्क्षौद्रैः रसोमंथानभैरवः कफरोगप्रशांत्यर्थंनिंबक्वाथंपिबेदनुः इतिमंथानभैरवरसः॥
सूतगंधकनागानां चूर्णंरंभाद्रिचारिणा दिनंघर्मेविमर्द्याथ गोलकानस्ययोजयेत् काचकूप्यांचसंवेष्ट्य
तांदृढंमृत्पटैस्त्रिभिः मुखंसंरुध्यसंशुष्कं स्थापयेत्सिकतान्वये सार्द्धदिनक्रमेणाग्निं ज्वालयेत्तदधस्त

रस०

तः स्वांगसीतं समुध्दृत्य मर्द्दयेन्नाम तं क्षिपेत् मरिचान्यर्द्धभागेन समस्तमपि मर्द्दयेत् अयमग्निकुमारः स्याद्रसो मंजरी मात्रस्य रक्तिका तांबूलीदलसंयुक्तो हंति रोगान्यथा नयं वातरोगान् समस्तांस्तन् कासपांडुकफोल्वणान् अग्निमांद्यं सन्निपातं पथ्यं ग्राम्यादिकं तथा जलयोग प्रयोगोयं प्रशस्तस्तापशांतये इति अग्निकुमारो

॥१८॥

रसः॥ शुद्धसूतं विषं गंधं अजमोदां फलत्रयं स्वर्जिक्षारं यवक्षारं वह्निं गंधकजीरकं सोवर्चलं विडंगानि सामु सैंधव द्रं त्र्यूषणं समं। विषमुष्टी सर्वतुल्या जंबीराम्लेन मर्द्दयेत् मरिचाभां वटीं स्यादेदग्निमांद्यप्रशांतये इति अग्नितुंडावटी॥ एकैकं विषसूतस्य जातीटंकौ द्विकं द्विकं कृष्णा त्रिकं विषं च द्वे दग्धकर्पर्द तथा द्वे वह्नि पुष्पं वाणमितं सर्वं समर्धयत्ता महोदध्याख्यवटिका नष्टस्याग्नेः प्रदीपनी॥ इति महोदधीवटी॥ रसगंधम तं शुल्वं मृतावृक्फलत्रिकं त्र्यूषणं बीजजैपालं समं खल्वे विमर्द्दयेत् द्रोणपुष्पीरसे नाम्नं शुष्कं तत्कुरु गालितं चिंतामणिरसो ह्येषो जीर्णं नंच प्रशस्यते ज्वरमष्टविधं हंति सर्वशूलं नरः गुंजैकं वाद्विगुंजं वा आ मरोगहरं परं इति चिंतामणिरसः॥ रसनिष्को गंधनिष्को विक मात्रः प्रदीपनः पलंसार्द्ध तात्रं चूर्णिका भिषक्॥ खल्वे विमर्द्दयेत्तं तु सूक्ष्मवस्त्रेण गालयेत् माषैकं च प्रदातव्यं भुक्तमांसादिजारकं अजीर्णे वृत्तिदोषे च शतभो राजवल्लभः इति राजवल्लभो रसः॥ शुद्धं सूतं द्विक्षगंधं यामैकं मर्द्दयेद्दृढं द्वयोस्तु संम्पुटलाम्रं संपुटे तं निरोधयेत् ऊर्ध्वाधो लवणं दत्वा मृद्भांडे धारयेद्भिषक् ततो गजपुटे पक्त्वा स्वांग

शीतं समुद्धरेत् संपुटं चूर्णयेत् सूक्ष्मं पर्णखंडे द्विगुंजकां भक्षयेच्छूलपीडार्तो हिंगु शुंठी च जीरकं वचा मरि
चजं चूर्णं कर्षमुष्णजलं पिबेत् असाध्यं नाशयेच्छूलं रसः स्याच्छूलकेसरी व्यायामं मैथुनं मद्यं लवणं क
टुकानि च वेगावरोधं सूत्रं च क्रोधं च परिवर्जयेत् इति शूलगजकेशरी रसः॥ टंकणं हारिणं शृंगं शु
ल्वं स्वर्णं मृतं रसं त्रिनेत्राख्यो रसो नामः माषैकं मधुसर्पिषा लेह्यं जीरकं हिंगु मध्वाज्याभ्यां लिहेदनु
पंक्तिशूलहरं ख्यातं मासमात्रेन संशयः॥ इति त्रिनेत्राख्यो रसः॥ भस्मसूतं मृतं कांतं मुंडभस्म शि
लाजतुः शुद्धताप्यं शिलाव्योषं त्रिफलांकोलबीजकं कपित्थं रजनी चूर्णं भृंगराजेन भावयेत् निशाद्वारान्
निशोष्याथ मधुसूक्ष्मं लिहेत्सदा निष्कमात्रं लिहेद्धरेन्मेहं वज्रो महारसः महानिंबस्य बीजानि पिष्ट्वा
षट्संमितानि च पलं तंडुलतोयेन घृतनिष्कद्वयेन च एकीकृत्य पिबेच्चानु हंति मेहं चिरंतनं॥ इति मे
हवज्रो रसः॥ मृतसूतं मृतं वंगं मर्जनस्य त्वचासिता तुल्यांशं चूर्णमेतत्तु रवेर्मर्दयेच्छाल्मलीद्रवैः
दिनांते वटिका कार्या माषमात्रा प्रमेहहा इयं इंद्रवटी नाम मधुमेहप्रशांतये॥ इति इंद्रवटी रसः॥
तालसत्वं हतं ताम्रं हतं लोहं हतं रसं हतं भस्मं हतं ताप्यं गंधकं तुल्यमतः शिलाः सौवीरांजनकासीसं
नीलं भल्लातकानि च शिलाजतु कर्ममूलं त्वक्दलीकं दचित्रकं त्वच मंकोलजां कृष्णां कृष्णधत्तूरमू
लकं श्रवणं गस्य बिजानि केरिकाह्विफलानि च हेमाह्वाफेनजा छं च हलिनी विषतिंदुकं तैलिनो

लोहकीटं च पुराणं भस्म तं चयत् त्वचं मीनसमा रसस्य पुनरुक्तं फलं पृथक् तैलिमो नवटंकास्तु
सर्वमेकत्र मर्दयेत् ॥ खल्वे निधाय दातव्या पुनरेषा च भावना भृंगदंडी शिरवा देवदाली च नीलि
का॥ बाणो शनो नमतरुर्निवसारो विनीतकः भृंगराजस्य गायत्री करंजास्तितिरीफलं मलमूय
॥२०॥ मलमे तेषां तिस्रस्तिस्रश्च भावनाः॥ दातव्यः पिपिकाः कृत्वा सम्यक् शोष्यं च चातपे भांडां तधारये
त्कांडं मुष्टितं चाथ कारयेत् यामयामाग्निना पाच्य पुटे मध्ये हसोरसः कुंडरीडां नति रसस्तु नात्र
कार्या विचारणा द्विमासाभ्यंतरे पुंसां तथ्यं पथ्यं भुजां खलु रोगिणामपि न संति कुष्ठानि सकलान्यपि
भानुभक्तिप्रसूतानां गुरुभक्तिकृतां सदा रसेंद्रमंगलो नाम रसोयं प्रकटीकृतः अनुग्रहाय भक्ता
नां शिवेन करुणात्मना॥ इति रसेंद्रमंगलो रसः॥ मृत ताम्राभ्र लोहानां हिंगुलं च षलं षलं जांबी
रोन्मत्तभृंगाद्भिः स्नुह्यर्कमुष्टिभिः मर्दहयारिजैर्द्रवैः प्रत्येकं च दिनं दिनं एवं सप्तदिनं मर्द्य तत्तु
वस्त्रेण वेष्टयेत् — वालुकायंत्रगं स्वेद्यं त्रिदिनं लघुवह्निना आदाय चूर्णयेत् श्लक्ष्णं दृणं पलैकं यो
जयेद्विषं द्विपलं पिप्पली चूर्णं मिश्रं सर्वेश्वरो रसः द्विगुंजं लेहयेत् क्षौद्रैः सुप्तिमंडलकुष्ठजित् वा
कुच्चे देवदारु च कर्षमात्रं विचूर्णयेत् लिहेद्देरं उते लेता अनुपानं सुखावहं॥ रक्ताधिके शिरा
मोक्षः पादे बाहु ललाटके कर्तव्यं दुष्टरोगेषु कुष्ठिनां च विशेषतः वलिनो वृद्धदोषस्य वमःस्यस्य

त्रारीरिणः परं श्रमाणमिच्छंति प्रस्थं शोणितमोक्षणे अभ्रे वर्षासु विश्वेतग्रीष्मकाले तिशीतले हे
मंतकाले मध्याह्ने शरत्काले त्रयः स्मृता ॥ इति सर्वेश्वरो रसः ॥ गंधकेन मृतं ताम्रं द्वात्रिंशांशमु
द्धरेत् कृष्णाभ्रं पंचभागं स्यात् मृतं वंगं द्विभागिकं सूक्ष्मचूर्णं कृतं सर्वं रक्तिकैकप्रमाणतः शतव्याकु
ष्ठिनेऽस्य मगनुमान प्रयोगतः गलितस्फुटिके चैव विसर्पे मंडले तथा विचर्चिका दद्रुपामासर्वकुष्ट
प्रशांतये ॥ इति उदयभास्करो रसः ॥ शारश्रं कर्षतालं च कूष्मांडस्वरसे क्षिपेत् स्वेदयेद्दोलिकायंत्रे
मात्रतोपं न विद्यते पश्चात्तं शोषयेत् खल्वे सूतं कर्षद्वयं क्षिपेत् तत्सर्वं वस्त्रभाराणि नीलां जंकज्ज
लीमवेत् स्नुहीक्षीरं रविक्षीरं छागीगोक्षुरवाकुची पातालगरुडी कोल्ह चक्रमर्दकजलः कुमार्य
मत्तनक्षात त्रिफला तु पुनर्नवा निंबत्वचा महौषध्याः पुटं दद्यात् पुटैस्त्रिभिः षट्वार्षं चूर्णं कालिका
हंडिकायंत्रगा ततः कारयेत चतुर्थांशं मध्ये स्थाप्य तु तालकं पार्श्वा उपरि चूर्णं तु सर्वं स्थाप्यं प्रयत्न
तः हंडिकाकंठपर्यंतं कुमारीमज्जपूरयेत् ततो मुद्रां दृढां कुर्यात् चुल्यां संस्थाप्य तां किल चतुर्यामं तु
दीप्ताग्निं विंशद्यामं मृदग्निना स्वांगशीतलमुत्तार्य भवेत्तालेश्वरो रसः पथ्यं तु मुक्त्वा लवणं कुष्ट
मष्टादशं हरेत् ॥ इति तालेश्वरो रसः ॥ हेमाकार्पंचपलिकां क्षिप्त्वा तक्रे वटे पचेत् तक्रे जीर्णे समुद्ध
त्य तालमिता विशोषयेत् तच्चूर्णितं पंचपलं मरिचानां पलद्वयं पलैकं मूर्छितं सूतं एकीकृत्य तु

रससं०

भक्षयेत् निष्कैकं सुप्ति कुष्टानां स्वर्णक्षीरी रसो ह्ययं ॥ इतिस्वर्णक्षीरीरसः ॥ जातीटंकणताला

नां भागाद्वापंचमाः स्मृताः ॥ युक्त्या सर्वं मर्दयित्वा शिवास्वरसभाविता भुक्तः कुष्टहरः सेव्यो सर्वदाभो

जनप्रियः ॥ इति तैलेश्वरो रसः ॥ भागैकं मूर्छितं सूतं गंधकं वह्निवाकुची स्वर्णं च वह्निबिजानां प्रतिद्वा

॥२१॥ दश भागिकं त्रिंशद्भागं गुडस्यापि क्षौद्रेण गुटिका भवेत् ॥ अयं ब्रह्मरसो नाम ब्रह्महत्याविनाशनं

द्विनिष्कभक्षणाद्धंति प्रसुप्तिं कुष्टमंडलं पातालगरुडीमूलं जलेनैवानुपिबेदनु ॥ इति ब्रह्मरसः ॥

मूर्छितं सूतकं धात्रीफलं निंबस्य चाहरेत् तुल्यांशैः खादिरैः क्वाथैर्दिनं मर्द्य च भक्षयेत् निष्कैकं द

द्रुकुष्टघ्नं परिभद्राभिधो रसः ॥ इति पारिभद्ररसः ॥ शुद्धं सूतं समं गंधं तुल्यं च मृत ताम्रकं मर्दितं वा

कुचैक्वाथैर्दिनैकं वटकं कृतं निष्कमात्रं विषं गंधं त्रिफला भृंगवाकुची भल्लातकं [illegible] तिलं कृष्णं ति

वबिजसमं समं मर्दयेत् भृंगराजद्रावैः शोष्यं शोष्यं पुनः पुनः ॥ इत्थं कुर्यात्त्रिसप्ताहं रसः श्वेतारिको

भवेत् मध्वाज्यैर्निष्कमात्रं तु खादेत् श्वेतं विनाशयेत् ॥ इति श्वेतारिरसः ॥ शुद्धसूतं द्विधा गंधं कांतं

लोमचमारितं मंजुरी वाकुचीबीजं निंबशप्लेष्मातकबीजकं विडंगं त्रिवृता वह्नि शृंगी कृष्णाति

लाभया शणस्य कुसुमं तुल्यं चूर्णयेच्च सिताघृतं कांस्यपात्रे स्थिरं खादेत् कर्षशमधुसर्पिषा।

सर्वकुष्टहरः सोयं महारोद्रेश्वरो रसः ॥ इति महारोद्रेश्वरो रसः ॥ सूत ताम्राभ्रतीक्ष्णानां भस्म

जरी

माक्षिकगंधकं वंध्याकर्कोटकीछायैस्तु मर्दयेद्दिनावधि वंध्याकर्कोटकीकंदे क्षिप्त्वा मृदावहि:
मूषरास्थेपुटे पाच्यं दिनमेकं विचूर्णयेत् दशमांशं विषं योज्यं माषमात्रं च भक्षयेत् रसं कालाग्नि
रुद्राख्यं दष्टाहेन विसर्पनुत् पिप्पलीमधुसंयुक्तं भक्षणानुपानं प्रकल्पयेत् ॥ इति कालाग्निरुद्रो रस: ॥ शुद्धसू
तं द्विधा गंधं कुमारीरसमर्दितं अहांते गोलकं कृत्वा हंडिकायां निरोधयेत् तयो: समे ताम्रपात्रे शुद्धे संधिं च ले
पयेत् तत्रार्के भस्मनाशं च चतु:याम तीव्राग्निना पचेत् द्वियामांते समुद्धृत्य स्वांगशीतं विचूर्णयेत् जंबीरस्य
द्रवै: पिष्ट्वा रुध्वा लघुपुटे: पचेत् गुंजैकं मधुनाख्येन लिहेद्भगंदरं मशाली लशुनं चान्नं आरनालजलं
पिबेत् भुंजीत मधुराहारं दिवास्वापं च मैथुनं वर्जयेत् शीतलाहारं रसेऽस्मिन् रवितांडवे ॥ इति रवितांडवो र
स: ॥ स्वर्णं सूतं समं गंधं मर्दयेद्याम चतुष्टयं नागवल्ली दलद्रवैर्मर्दनाद्पुनर्नवा गोमूत्रे पिप्पलीयुक्ते मर्द्य
रुध्वा पुटे लघु ॥ [illegible] लिहेत् लोहरसो रोगे रोगजामाश्रोऽर्दरं जयेत् ॥ इति रोगहरस: ॥ शुद्धसूतं पलैकं तु द्विपलं
शुद्धगंधकं मृतं ताम्रं मृतं लोहं प्रत्येकं च पलत्रयं भृष्टं लांगली दंती चित्रकं पिप्पलीकं तथा प्रत्येकं द्विपलं
योज्यं वत्सनाभं च टंकणं उभौ पंचपलैर्योज्यौ सैंधवं पलपंचकं धात्रीफलत्रिफलागोमूत्रे स्नुहीक्षीरं च तत्समं मृ
मृद्वग्निना पाचयेत्तं सर्वं स्याल्लांमाघवत्स पुजितं माषद्वयं सदा खादेद्दुर्नामहृद्य: कुमारक: ॥ इति अर्शकुठारो रस: ॥
मृतसूतं ताम्रं लोहार्कं विषं गंधं समं समं सर्वतुल्यांशात्रिफलमेकत्र चूर्णयेत् ॥ द्रवै: श्वरणकंदोत्थै: ख

रसम.

न्वे मर्द्द दिनत्रयं माषमात्रं लिहेद्राजैः रसश्चार्शो विनाशयेत् रसो नित्योदितो नाम अर्शोरोगकुलांत-
कः हस्तपादे मुखे नाभ्यां गुदे वृषणयोस्तथा शोथो हृत्पार्श्वशूलं च यस्यासाध्योऽर्शसो हि सः असाध्य-
स्यापि कर्त्तव्या चिकित्सा संकरोदिता इति नित्योदितो रसः॥ गंधकं तालकं ताप्यं मृतं ताम्रं मनःशिला शुद्ध-

॥२२॥

सूतं च तुल्यांशं मर्दयेद्याममात्रकं पिप्पल्याम्लकषायेण वज्रीक्षीरेण भावयेत् निष्कार्द्धं भक्षयेत्क्षौद्रैः
गुल्मप्लीहादिकं जयेत् रसो विद्याधरो नाम गोमूत्रं च पिबेदनु। इति विद्याधरो रसः॥ भस्मसूतं वंगभस्म वा
गैके कं त्र्यकं लमयेत् गंधकं च मृतं ताम्रं प्रत्येकं च चतुष्पलं अर्कक्षीरैर्दिनं मर्द्य सर्वं तज्जोलकीकृतं रुध्वा
तद्भूधरे पाच्यं पुटैकेन समुद्धरेत् एष वंगेश्वरो नाम प्लीहगुल्मोदरं जयेत् माषमात्रं लेहयेत् निष्कं श्वेत
पुनर्नवा गवां मूत्रे पिबेच्चानु रजनी वा गवांजलैः इति वंगेश्वरो रसः॥ पारदं त्रिफला तुल्यं च जेपालं पिप्प-
लीसमं आरग्वधफलामज्जा वज्रीदुग्धेन मर्दयेत् माषमात्रं वटीं खादेत् स्त्रीणां चोदरं हरेत् त्रिफ-
फलरसं चानुपथ्यं दध्योदनं हितं रक्तोदरहरश्चैव कठिनं रेचनेन तु इति उदरारि रसः॥ पिप्पलीमारितं ता-
म्रं कांचनीचूर्णसंयुतं स्नुहीक्षीरैर्दिनं मर्दयेत् जेपालबीजकं निष्कं खादेद्विरेको यं स संहंति जलो-
दरं रेचनानां तु सर्वेषां दध्योदनं स्तंभने हितं आमलैश्च प्रशातमं मन्मथा मुञ्च रेचकं॥ इति जलोदरारि रसः॥
रसेंद्र भुजगो वंगं ग्रंथितो चूर्णितो पुनः ब्रह्मपुत्रार्द्धसहितौ मारिचेट् त्राभागिकैः श्लक्ष्णचूर्णीकृतो ह्येष

गरी

राक्षसोरसउत्तमः ॥ अर्द्धगुंजं गुंजमितं माहारात्सर्वमाहरेत् तांबूलेन समस्तानां कफामासक अग्निनां
कृतं नंदीपनं वश्यं जारणं शोधनं परं नकुनाकि मिदोक्तेन परमे तद्विवर्जितं ॥ इति राक्षसो रसः ॥ सूतं
टंकणं तुल्यांशं मरिचं स्यात्तत्तुल्यकं गंधकं पीपली शुंठी द्वौद्वौ भागौ विचूर्णयेत् सर्वं तुल्यं क्षिपेद्दंती बीजानि नि
स्तुषानि च द्वियुंत रेचनं सिद्धं नाराचोयं महारसः गुल्मं प्लीहोदरं हंति पीत्वा चैवोष्णवारिणा ॥ इति नाराचरसः ॥
शुंठी मरिचसंयुक्तं रसगंधकटंकणं जेपालं त्रिगुणं प्रोक्तं सर्वमेकत्र मर्दितं इच्छाभेदी द्विगुंजस्यात् सितया सह दा
पयेत् यावत्सुखोदकं पीत्वा तावद्वेगान् विरेचयेत् तक्रोदनं च दातव्यं मिष्टान्नेदीपथ्येच्छया ॥ दोषाः कदाकु
पिंतिजिता लंघनपाचनैः ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः बालवृद्धावति स्निग्धः क्षतक्षीणा भयान्वि
ताः श्रांतस्तृषार्त्ताः स्थूलश्च गर्भिणी च नवज्वरी नवप्रसूता नारी च मंदाग्निश्च मदात्ययी शल्यार्दितश्च रू
वि क्षो नरे च विजीनता इति इच्छाभेदी रसः ॥ अच्छानां शुद्धताम्रस्य पत्राणां पलविंशतः पलानि पंच सूतस्य
मर्दयेन्निंबूकद्रवैः तावत्संमर्दनं कुर्याद्यावत्संलगते रसः मूषांतर्मध्ये निक्षिप्य तस्योर्ध्वाधश्च गंधकं पूरयेच्चू
र्णयित्वा तु सम्यक् दत्वा पलोन्मितं चुल्लिकाग्नौ पचेत्सम्यक् निरुध्य घटिकात्रयं स्वांगशीतलमादाय चू
र्णयित्वा पुनश्च तं त्रिभागं कारयेत्तत्तु भागमेकं पुनः पचेत् गोमूत्रे विंशतिवारान् सर्वरोगापहं तेरसः ३
ना

रसमंजरी

उदराग्निं कृमीन् हंति निद्रामालस्यसंचयं शाम्येच्छीतोपचारेण तस्मादुष्णां क्रियं चरेत् पुनर्द्वितीयभागं तु गो
क्षीरेण पचेच्छनैः सप्तवारं तथा तोये नारिकेरस्य भावयेत् अयं गौरसो नाम सर्वशूलनिकृंतनं नाभिकुक्षि
जवं शूलं शिरःकर्णाक्षिजं तथा मुखपाकं पांडुरोगं मुखरोगं च दारुणं वातपित्तज्वरं चैव द्वंद्वजं सान्निपातकं
क्षयं कासं कृमिं चैव निद्रामाद्दीपनं परं पुनस्तृतीयभागं तु कटुघण्टिरिकारसैः भावयेद्विंशतीवारान नामतो

॥२३॥

जायते रसः देयोस्य वल्लमात्रस्तु तांबूलीदलसंयुतं वमनं सर्वरोगघ्नमुपचारस्तु पूर्ववत् विषूचिकामप्यपि
तत्क्षि रोगान्नाशयेत् किंपुनर्वक्तुं नोक्तेन सर्वशूलहरः परः भस्मकुलीर्यते वह्निः तस्मादुदयभास्करः राजीः
कालवणं नारिं कषायं कटुकं त्यजेत्॥ इति उदयभास्करो रसः॥ स्वर्णद्रुमगुणं सूतं मर्दयेद्विकगंधकं रक्त
कर्पासकुसुमैः कुमार्या द्विदिनं ततः शुष्कां काचघटीं रुद्ध्वा वालुकायंत्रगां हवन् भस्मकुर्याद्दिनैर्द्वादश नवार्कक्षि
रणो परमं भागोस्य भागाश्चत्वारः कर्पूरस्य सुशोभनाः लवंगं मरिचं जातीफलं कर्पूरमात्रया मेलयेन्मृगना
भिश्च गद्याणकमिदं ततः श्लक्ष्णपिष्टो रसः श्रीमान् जायते मकरध्वजः वल्लं वल्लद्वयं चास्य तांबूलीदल
संयुतं भक्षयेन्मकरस्निग्धं लघु मांसमवातलं श्वेतंशीतं सीताधुक्तं दुग्धं गोधूमषष्टिलं माषान्नमिष्टम
परं भक्ष्याणि विविधानि च करोत्यग्निवलं पुंसां वलीपलितनाशनं मेधायुःकांतिजननः कामोद्दीपनकृत्स

ग उरी

हान् अभ्यासात्साधकस्त्रीणां शतं जयति नित्यशः इति कालेश्वरतां तेच पुनः सेव्योरसोत्तमः मानहानिकरो
रोगाणां मरणानां सुनिश्चितं कृतिमं स्थावरं विषं जंगमं विषवाश्चि मविकाराम जनति साधकं इस्य नस्सरातम
सुंजयो यथाभ्यासान्मृत्युं जयति दिदिनां तथायं साधकं इस्य जरामरणनाशनः इति मकरध्वजो रसः ॥ ता
म्रं कान्तं सुवर्णं च ताम्रं सूतकगंधकं लोहं क्रमविवृद्धानि कुर्यादेतानि मात्रया विमर्द्य कन्यकाद्रावैर्मर्दयित्वा
च मध्ये घटे विमुद्य पीवरीमध्ये धारये सैंधवे मृते ॥ पिवरीमध्ये संस्थाप्य ततश्चूर्णानि मेलयेत् वह्निना
तेः सनैः कुर्याद्दिनैकं ततउद्धरेत् स्वांगशीतं च संचूर्ण्य भावयेदर्कदुग्धकैः अथ गंधार्चकाकोलीवानरी
मुशलीमुराः त्रिविवेलं रसं भावयेल् पद्मकं रक्तसैरुणां रसैः कासमभावयेत् कस्तूरीमो
सकर्पूरं कंकोलीलाजवंगकं पूर्वचूर्णाद्दष्टमांशमेतच्चूर्णं विमिश्रयेत् सर्वैः समांशर्करां चदत्वाशाणो
न्मितं पिबेत् गोदुग्धं द्विपलैनैषमधुराहारसेवकः अस्य प्रभावात्सौंदर्यं बलं तेजोभिवर्द्धते तरुणीरम
ये दक्षो नच द्रवति प्रजायते ॥ इति मदनकामदेवो रसः ॥ शाल्मलीस्वरसे विमर्द्य पलैकं सूतकं यामद्वयं
पचेत् काजे वस्त्रे वध्वाथ मर्दयेत् दिनैकं शाल्मलीद्रावैर्मर्दयित्वा वटीकृतं वेष्टयेन्नागवल्ल्याथ निक्षिपेत्
काचभाजने भाजनं शाल्मलीद्रवैः पूर्णयामद्वयं पचेत् वालुकायंत्रमध्ये तु स्वांगशीतं समुद्धरेत् द्विगुंजं भ
क्षयेत्प्रात नागवल्लीदलांतरे मुशलीसहितां क्षीरैः पलैकां पाययेदनु रसः श्रेष्ठो नामायं सम्यगुर्वीर्यक

रसमं

रोभवेत् कामिनीनां सहस्रैकं नरः कामयते ध्रुवं इतिपूर्णेंदुरसः॥ शुद्धं सूतं समं गंधं मृहंकं हारजैद्रवैः जटी
मर्दितं वालुकायंत्रे यामं गजपुटे पचेत् रक्तोत्पलदलद्रावैर्भाव्यं दिनैकं तस्मिन भक्षं मधोछंभ त्वेमेव तेन कामये
त्कामिनीशतं॥ इतिकामिनीमदभंजनोरसः॥ स्वच्छसूतं समं गंधं रक्तोत्पलदलद्रवैः यामं मर्द्यं पुनः गंधं शु
द्धं ईष निक्षिपेत् तद्द्रवैर्मर्दये चाक्रा पुनर्गंधकमर्दनं सर्वाङ्गवैर्दिनेकं तु काचकूप्यां निरुध्य च॥ दिनेकं वा

॥२५॥

लुकायंत्रे पक्वमुल्म भक्षयेत् पंचगुंजा सितासाईं रसोयं मदनोदयः समूलं चसवीजं च धत्त्राचित्रकरीस
न॥ गवां क्षीरेण तत्सेव्यं पलार्द्धमनुपानकं इतिमदनोदयरसः॥ पलद्वयं द्वयं शुद्धपारदं गंधकं तथा मृतहे
मं समु कर्षैकं पलैकं मृततामकं मृतसारं चतुर्निष्कं मर्द्यं पंचामृतैर्दिनं रुध्वा तु भपुटे पाच्यादिनैकं रसमुद्धरे
त् पिप्पल्यां पंचामृतैः कुर्याद्वटिकां वदराकृति अनंगसुंदरं खादेत् इमेद्रामात्रातत्रयं इतिउदयसुंदरोरसः॥
शम्भुग्रमारितमभ्रकं कटुफलं कुष्ठाश्वगंधामृता मेथीमोचरसा विदारिमुशली गोक्षुरकेक्षुरकं रंभाकंदम
ताबरीह्य जमुद्रामाषास्तिलाधान्यकं मधीनागवल्लाकर्हरिमदनं जातीफलं सैंधवं भार्गीकर्कटशृंगी त्रिक
टुजीरद्वयं चित्रकं चातुर्जातपुनर्नवागजकणा मल्लासनीवासकं वीजं मर्कटिका मुसली त्रिफलकं चूर्णं
समंकल्पयेत् चूर्णांशाद्विगुणा सिता गाढि गुलिता मध्वाज्य मोः पिंडितं कर्षार्द्ध गुटिकां विलेह्य मधवा त्रासेषासेद्रा
कामीभिः पेयं क्षीरसितानुवीर्यकरणे स्तंभेप्यमं कामिनां रामाकम्पकरं सुखाति मुपदं रतं गणनाशकैव

वीर्यपुष्टिकरं स्तंभक्षयकरं हंसाश्रुसर्वामयं कासश्वासमहातिसारसमनं मंदाग्निसंदीपनं अर्शासिग्रहणी
प्रमेहनिचयं श्लेष्मातिसारप्रणुत् निद्रानंदकरं विरोगकविता नाचांविजाधोजुवं धते सर्वगुणं महास्थिरद
न्राधेनावधानास्फलं आसासेन निहंति मृत्युपलितं कामेश्वरो नत्वरात् सर्वेषां हितकारको निगदितः श्री
नित्यनाथेन तुः इत्या नामदनोदयोदयकरः श्रीढांगनासंगमे सिद्धोयं ममहृष्टप्रत्ययकरो राज्ञा सदासेवितां॥
इति कामेश्वरो मोदकः॥ अथ भाग्नोमणित्वाद्नु वेत्तत्रसंगतः द्विप्रमारोगपराषिताद्देषधेभोरसोधिकः

३

मस्पृशे रस्य योगस्तेनै वसहजोपयेत् रसैर्हरते रोगान् नरकुंजरवाजिनां त्रिकोटिजन्मानि कृष्णो विडालः
स्याज्जन्मलक्षाणि खरश्वकाकः गृध्रश्वजातं धकशृश्वमूषकाः स्पर्शीनराधे रसनिंदकाश्च आलापं गात्रसं
स्पर्शं यः कुर्याद्रसनिंदकेः मावजन्मसहस्राणि समवेदुःखपीडितः इति रसः॥ पलं मृदुस्वर्णदलं रसें
द्रः पलाष्टकः बोडशगंधकस्य शाणैः सुकर्पासभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारिकाभिः तत्काचकुंभेनिहि
तं सुगाढे मृत्कर्पटैस्तद्दिवसत्रयं च पचेत् क्रमाग्निना सिकतारव्ययंत्रे ततो रसः पल्लवरागरम्यं निरह्यचैल
स्य चलंपजाति चत्वारिक ईररजस्तथेव जातीफलं सोमणमिंदुपुष्पं कस्तूरिका भाद्र्शाणमेकं चंद्रोदयो
यं कथितो स्वभावो गुक्तोधिरं नीर्दलमध्यवत्तीमदोन्मदानां प्रमदासतानां गर्भाधिकत्वं लघयस्तकांडः श्रा
तंमनीभूतमतीव दुर्धं मृदूनि मांसानि समं तकानि नवान्नमिष्टान्नमनंतिपथ्यमानंददाथीज परागि

चात्र वलीपलितनाशनस्तत्सुभृतां नयः स्तंभनतः समस्तगदखंडनः प्रचुरयोगपंचाननोऽहेतुरसराजभंज

तिमस्य चंडोदयः संभवच्छरदर्पितोमृगदृशांकथंवचनः ॥ इति चंडोदयरसः ॥ शुद्धसूतं पलाम्बष्ठेकुनटी

स्यात्समं क्षिपेत् नागपत्रं चाष्टपलं चाष्टौ स्यात्कुष्ठगंधकं एकत्रकज्जलिकृत्य काचकूप्यां विनिःक्षिपेत्

वालुकायंत्रकं चाग्निं यामषोडशकं दृढं अनेन माणिक्य वर्णो यं शुक्रस्तं करोति च ज्वरव्याधिविनाशाय रा

जरोगकुलांतकृत् दशरात्रप्रयोगेन महाव्याधिविनाशनं रक्तिकाईसदापथ्यं वृद्धो भवतु यौवना: ॥ इति

माणिक्यरसः ॥ ओषं चत्रिफलासूतं लोहभृंगचताम्रकं पुत्रमातृपयश्चैव कारयेद्वटिका दृढः दुग्धेन त्वा

जनं कृत्वा एकांगज्वरनाशनं पुनरेव द्वयं चक्रः सर्वांगज्वरनाशनं ॥ इति चूर्ण नाडीस्वरो रसः ॥ स्वर्णमु

क्ता दरदमरिचं भाग हद्भाग्रयो ऽंसस्वर्णपिष्टो प्रथमनवनीतेन निंबुनाच यावत्स्नेहो व्रयति विलपंम

र्दये तावदेव गुंजामात्रं भक्षचपलयासर्व रोगे वसंत: स्वासे कासे ज्वलनमांद्ये ज्वरे चपद्मातंके रक्तपित्ते

चदाहे योजं चेत मानवानां हिताय योगैर्युक्तं नाशये रोगमेतत् ॥ इति वसंतमालती ॥ इति श्री रसमंजरी

तंत्रे षष्ठोध्यायः ॥ ६ ॥ प्रणम्य निर्भयं नाथं संदर्दे वं जगत्पतिं दिगंबरं त्रिनेत्रंच जरामृत्यु विनाशनं ॥ मृ

ताभ्रं मैनत्वयेदादौ मासमेकं विचक्षणः पश्चात्तं शोधयेद्देहे क्षेत्रीकरणमिच्छता अक्षेत्रीकरणे सूतो

अमृतं च विषं भवेत् फलसिद्धिः कुतस्तस्य सुविजस्यो स्व प्ररेयथा कृत्स्नं क्षेत्रीकरणं सर्वस्मिंश्च रसायने

अमृतं च विषं चैव लिंकौ ... (marginal note, vertical)

नाडीत्रकरणाद्देवि किंचित्कुर्याद्रसायनं भस्मसूतद्विभागं गंधं तालकं भाविमर्दयेत् रुध्वा लघुपुटे पाच्यं उद्धृत्य सम र्दि
कसर्पिषा निष्कं खादेज्जरामृत्युं हंति गंधामृतो रसः सम्यग्भृंगराजं तु छायाशुष्कं विचूर्णयेत् तत्समं त्रिफला
चूर्णं सर्वतुल्या सिता भवेत् पलैकं तत्स्यपेचानु भक्षयेत् मृत्युजरापहं इति गंधामृत भृंगरसायनं॥ मृतसूतसमा
शं संहेमभस्म प्रकल्पयेत् क्षीराज्यमधुनामिश्रं माषैकं कांस्यभाजने लेहयेत् माषषट्कं तु जरामृत्युविनाश
नं वाकुचीचूर्णकर्षैकं धात्रीफलरसप्लुतं अनुपानं लिहेन्नित्यं स्यादसौ हेमसुंदरः॥ इति हेमसुंदरो रसः॥
अथ गुटीकामाह॥ शुद्धसूतं वज्रभस्म सत्वमभ्रकतास्ययोः कांतलोहसमं हेमबीजं वीरैर्मर्दयेद्दृढं सर्वाहं
सर्वतुल्यांशं गोलं कृत्वा समुद्धरेत् गोजिह्वा नागदंती वंध्या निर्गुंडी मधुसैंधवैः लेपयेद्वज्रमूषां तां गोलकं तत्र
निक्षिपेत् तत्कल्कैः छादितं रुध्वा तत्सैकं भूधरे पुटेत् यामं यामं समुद्धृत्य लिप्त्वा मूषां पुनः पुनः रुध्वाथ
पूर्ववत्साम्यमेवं पक्त्वा समुद्धरेत् सवचिंचाफलस्वर्जीराजीकर्पासतन्मूलैः एतैः प्रलेपयेन्मूषां गुटिकां तत्र
निक्षिपेत् टंकणं सितकाचं च दत्वा दत्वा धमेद्दृढं खदिरांगारयोगेन द्रुतीयं भवते रसः मूषामांबिरुयोगेन
रसो हेमं च जायते ततो नियामकैर्मर्द्य सगोमूत्रैर्दिनैकतः अंधमूषागतो ध्मातो रद्रो भवति वज्रवत् मृत
संजीवनी नाम गुटिका भवति वक्त्रगा कर्षमात्रं जरामृत्युं हंति निःसंशयो दितं शस्त्रस्तंभं च कुरुते त्रस्तासुग्र
भवेन्नरः इति मृतसंजीवनी नाम गुटिका॥ नागवल्लीदलद्रवैः सप्ताहं शुद्धसूतकं मर्दयेत्क्षालयेद्दैलं अनु

९

रस॰ ॥२५॥

निष्कद्वमाणं मात्रकं विषकंदगतं कृत्वा विषेण च निरोधयेत् ततः शूकरमांसस्य गर्भे निःक्षिप्य पाचयेत् संध्या
कालेन लिंदत्वा कूष्मांडकं वारुणीयुतं ततस्तु रसं लोहपात्रे तैलेथ तत्र बीजके क्षिप्त्वा विंशति लेपान्यं तद
सं मांसपिंडगं संध्यामारभ्य मंदाग्निना यावत् सूर्योदयो भवेत् हठयोगे जागरणं कुर्यात् तथा ततस्सिद्धिर्भवेत् शा
तस्फटिकगुटिकां क्षीरभांडे विनिक्षिपेत् ततः क्षीरं स्थापयति क्षिप्रमेतत् सर्वकारकं रतिकाले मुखे धार्या गुटि
का वीर्यरोधनी क्षीरं पीत्वा रमेत् रामां कामव्याकुलितेंद्रियः मुखस्थां धारयेद्यावत्तावद्वीर्यं न मुंचति॥ इति
वीर्यरोधनी गुटिका॥ इति रसमंजरीतंत्रे सप्तमोऽध्यायः॥७॥ अथ सर्वनेत्ररोगस्य प्रशमं अंजनमभिधीयते
हेमंते शिशिरे चैव मध्याह्नेंऽजनमिष्यते पूर्वाह्ने चापराह्ने वा ग्रीष्मे शरदि चेष्यते वर्षास्वनत्युष्णशीते वसं
ते च सदैव हि शांते घर्मे रुदिते भीते पीतमद्ये नवज्वरे अजीर्णे वेगघाते च नांजनं संप्रशस्यते हरेणुमात्रां
कुर्वीत वर्तिं तीक्ष्णांजने भिषक् प्रमाणं मध्यमस्यार्द्धं द्विगुणं तु मृदौ भवेत् सूतकं गंधकोपेतं चांगेरीरस
मूर्छितं॥ अंजनं दृष्टिदं नृणां नेत्रामयविनाशनं रसेंद्रभुजगौ तुल्यौ ताभ्यां द्विगुणमंजनं ईषत्कर्पूरसंयुक्तं
मंजनं नयनामृतं शुल्वसर्पविसात्रांबं कतकाफलमंजनं रसकृत्सेयमचिरात् तानां दृष्टिप्रदः कंगभाणा
श्वच त्वारस्त द्वे नमनःशिलाः मनःशिलार्द्धं मरिचं मरिचार्द्धं च पिप्पली वारिणा तिमिरं हंति अर्बुदं हंति
मस्तुना पिच्चटं मधुना हंति स्त्रीक्षीरेण नक्तमं अपामार्गत्रिकां घृष्ट्वा मधुना सैंधवेन च ताम्रपात्रेभ्र

मंजरी

२६

९

थि

तानेत्रे हंति पीडां सुदुस्तरां दंतिदंती वराहोष्ट्र गोहयाश्वखरोद्भवैः शंखमुक्तामौफेनमृत्तैः सर्वविचूर्णितं
दंतिवर्तिकृता स्निग्धा शुक्रैणं नाशिनी परा: तुत्थमाक्षिकसिंधूत्थशिलाशंखमनःशिला गैरिकोदधिफेनं च
मरिचं चेति चूर्णयेत् संसयोज्य मधुना कुर्याद्दंष्ट्राभां रसक्रिया॥ वर्त्मरोगं सतिमिरं काचशुक्रहरं परं शंख
नाभिर्विभीतस्य मज्जा पथ्या मनःशिला पिप्पली मरिचं कुष्ठं वचा चेति समांशकं छागीक्षीरेण संपिष्य वर्ति
:कुर्याद्यवोन्मिता हरेणुमात्रां संघृष्य जलैः कुर्याद्यथांजनं तिमीरं मांसवृद्धिं च काचपटलमर्बुदं रात्र्यंधं नार्षि
कं पुष्पं वर्तिश्वं झोदयाजयेत् शुद्धे नागे द्रुते शुद्धं सूतं चैव विनिक्षिपेत् कृष्णांजनं तयोस्तुल्यं सर्वमेकत्र चू
र्णयेत् दशमांशे न कर्पूरं तस्मिन् चूर्णं प्रदापयेत् एतत्सर्वं तरे नेत्रगदाजित् नयनामृतं मुक्तफाणितलेहश्चाच
क्रमो यदि दीपते अचिरेणैव तद्धारि तिमिराणि अपोहति जातारोगा विनश्यंति न जवंति कदाचन:॥ त्रि
फलाया कषायेण शातनेयनधावनात्॥ इति नेत्रांजनं॥ अथ केशरंजनमाह:॥ त्रिफला लोहचूर्णं तु नारी
एण पेषयेत्समं द्वयोस्तुल्यो न तैलेन पचेन्मृद्वग्निना पचेत् लणातैलतुले भृंगरसे यावत्तैलं च पाचयेत्।
स्निग्धभांडे गतं भूमौ स्थितं मासात्समुद्धरेत् सप्ताहं लेपयेन्नेष्टक माश्वदलैः शिरः निर्वाति क्षीरभोजी स्या
त् क्षालयेत्त्रिफलांजलैः निसमेवप्रकर्तव्यं ससाहं रंजनं भवेत् यावज्जीवं तस्यैदं कचास्य भ्रमरोपमाः
॥अथ मषकारः॥ काकमाचीपबीजानी समं कृष्णतिलं ततः तत्तैलं ग्राह्यमेसात्रे तच्चैव केशरंजनं

॥अथान्यप्रकारः॥ लोहमलामलकल्कैः सजयाकुसुमैः सदाटाम्लापी पक्कीतानीहनत्रयंपतिगंगास्नायी
चनरकाणि॥ अन्यप्रकारः॥ काश्मर्यामूलमार्द्रीसहचरकुसुमं केतकीनां च मूलं चूर्णं लोहं सभृंगं
त्रिफलाजलयुतं तैलमेभिः पचेत् कृत्वा लोहस्य भांडे क्षितितलनिहितं स्थापयेन्मासमेकं केशाः केशाग्र स
काः शभ्रमरकुलनिभा रंजनादेवमुक्तं॥ अथ श्मश्रुकीकरणं॥ वज्रीक्षीरेण सम्यक्सुश्वेतं भावयेत्तिलं
तत्तैललिप्ताः केशास्तु श्मश्रुकाश्च न तत्र संशयः॥ इति श्रीरसमंजरीतंत्रे केशरंजनं नामाष्टमोऽध्यायः॥ ॥८॥
अथ वीर्यस्तंभनं॥ कर्परं टंकणं सूतं तुल्यं मुनिरसं मधु मर्दयेत्वा लिंगलेपं कुर्यान्मंदं रविजं वितं ततः प्रक्षा
लयेत्तं तु रसेज्ञां यथोचितं वीर्यस्तंभकरो लेपः पुंसां नागार्जुनोदितं॥ अन्यप्रकारः॥ कृकलासस्य पु
छाग्रं मुद्रिकाग्रे ततं तत्र स्थि वेश्याकनिष्ठ्यां धार्यं नरो वीर्यं न मुंचति मंजनापर्ण्यबीजानि पिष्ट्वा तानि प्रले
पयेत् यावत्तिष्ठत्यसौ लेपस्तावद्वीर्यं न मुंचति॥ चटकांडं च संगृह्य नवनीतेन लेपयेत् तेन लेपयते पा
दौ शुक्रस्तंभश्च जायते यावल्लेपस्तत्रोऽस्ति तावत्स्यान्नात्र संशयः॥ अन्यं च॥ वनक्रोडस्य दंष्ट्राया
दक्षिणस्या समाहरेत् कटिबध्वा च मंत्रेण शुक्रस्तंभकरी मतः॥ अथान्यः॥ स्थूलमीनं समादाय सम्य
क्स्वर्णेन वेष्टयेत् उद्घाटते कृते किंचिद्वक्त्रे वीर्यं न मुंचति॥ अन्यप्रकारः॥ डुंडुभो नाम सर्पोऽथि कृ
ष्णसर्पस्तमाहरेत् तस्यास्थिक्षारणे कट्यां नरो वीर्यं न मुंचति॥ विमुक्ते मुंचति नरः सिद्धयोगा उदाहृतः

॥अथान्यः॥ रक्तापामार्गमूलं तु सोमवारे निमंत्रयेत् भौमे प्रातः समुद्धृत्य कटिबद्धं वीर्यधृक्॥ अथ मंत्रः॥
ॐ ह्रीं क्लीं नमो नमः स्वाहा ॐ क्लीं॥ अन्यः॥ श्वेतगुंजलसीमूलं तांबूलैः सह भक्षयेत् न मुंचति नरो वीर्य
मेकैकेन न संशयः॥ अथान्यः॥ शुक्रशिलानाम्या मूलं दृढमंगुष्टानि पीड्य चितांतर निहितानि हि तमसाः
कुपितस्य स्मृतिर्जयति॥ इति वीर्यस्तंभनं॥ अथ राधाख्य नक्षत्रे जंगमूलीकाधृतं निषातारायन
स्थाने पुंषषंडत्वकारणं॥ अथ मंत्र॥ निर्गुण्डी चूर्णेन भाविते नाजवारिणा पानात्स्नानप्रयोगेन खं
डत्वं जायते नृणां॥ इति षंडत्वकरणं॥ एक एव महाद्रावि माजती संभव नोरसः मधुसैंधवसंयुक्तो
रवतमलान्वितं किंपुनः स्वत्रित्रिमुक्तो मधुकर्परपारदैः एतद्विमर्दिगोरामां दासीव कुरुते रतिं
इति स्त्रीद्रावणं॥ नालामध्यास्थितं नामतद्वा होमं चतुष्टयं तद्वहिः स्मापुरद्वंद्वं लिखित्वा जील
पाखिलं शुभनक्षत्रसद्वारे स्थापितं मध्वनिक्षेपं स्त्रियमाकर्षति द्विपयंत्रमेतन्नसंशयः इ
ति स्त्री आकर्षणं॥ कृत्वा ज्वलनं नगेनिस्यं कृत्वा मलकफल्कजैः वृद्धापि कामिनी कामं चालव
त् कुरुते रतिं तुंबिपत्रसलोघ्रं च सम भागं प्रकल्पयेत् भगलेपे प्रजायेत वृद्धा ताप्यक्षतायथा॥ इति योनि
संकोचनकरणं॥ हरितालचूर्णकल्कलिका लेपात्स्नेहवारिणा सद्यः निपतंति केशाः तिमिरः कौतुकमिदम्॥
सि
अद्भुतं कुरुते॥ इति योनि लोमशातनं॥ सपद्मबीजं तथा मदितं च सलचारिणी दृढं क्षिणं स्तनद्वंद्वं मांसे

रसमंजरी

नकुरुते दृढं ॥ अन्यदपि॥ मुंडीचूर्णकषायेण पुतं ते लं स्वपाचितं पतितं यौवनं चस्यान्मासादेवोन्नतांस्त्रे
त् इतिस्तनदृढीकरणं॥ तंदुलीयकमूलानि पिष्ट्वा तंदुलवारिणा: कृत्वं ते चत्र दंपीता वंध्या भवति निश्चि
तं॥ अथान्य:॥ कांजिकेन यनापुष्पं पिष्ट्वा पिवति योगवा कृतौ पुष्पं नष्ट तेसौ निंवकाथेन युक्तितः कृत्वं

॥२८॥

ते मरैस्तां नित्यं गर्भदुःखवर्जिता। गर्भनिवारयत्येषा रंडी नामन्य योषितां धूपिते योनिरंध्रे च निंवकाथे
न युक्तितः कृत्वं ते रमतां नित्यं गर्भदुःख(स्व) वर्जिता॥ इति गर्भनिवारणं॥ नागकेशरपुष्पाणां चूर्णं मि
सर्पिषासमं पीतं स्त्रिविन्मते गर्भमाता दुग्धान्नभोजिनी बीजानि मातुलुंगस्य दुग्धस्विन्नानि सर्पिषा ग
र्भं च कुरुते नित्यं वंध्यानाम पि योषितां॥ अथान्य:॥ कुरंटमश्वगंधा वाककौटी त्रिशिखि चूलिका एकै
का कुरुते गर्भं पीता क्षीरेण योषितां घृतेन सह पातव्यं वंध्यागर्भप्रदं परं॥ अन्यच्च॥ पुष्पोद्धृतं लक्ष्मणाया
मूलं पिष्टं च क[illegible]मकां कृत्वैते श्च तदुग्धान्सौ पीत्वा प्राप्नोति बालकं॥ इति वंध्यायोगनिवारणं॥ मातुलुं
गस्य मूलं तु मधुवा मधुसंयुतं घृतेन सह पातव्यं सुखं नारि प्रसूयते॥ अन्यं च॥ तुषांबुपरिपिष्टेन वं
कटेन परिलेपयेत् लांगल्या मूत्रेणैव सूते प्रथमा यन्नगर्भिणी गर्भिणी सुखप्रसवः॥ अथ मंत्र:॥ ॐ म
न्मथ मथन लावाहि चावलं ओरंरं मुंच मुंच लंघक स्वाहा १०८ अनेनमंत्रेणाभिमंत्र्य तैलं पानार्थं जल
एणमेकीकृत्य शिरसि दत्वा पातं चदीयते ज्ञागेव प्रसवो भवति॥ अथ बालचिकित्सा॥ बालरोगं स्व

निष्कं च चित्रकां वरं सकन्यक धनूरम(?)
तिंकाढु कोरउटिका कं सषिता(?)

ॅगात्रमोपनमित्यादि दक्षिणां तं बलिं क्षिपेत् षष्टेच दिवसे मासे वर्षे गृह्णाति बालकं शकुनीनाम साज्ञेया कासश्वासोज्वरो रुचिः १५८

ध्यामि समासाद्भावलोदितं पूजाद्यं दिशोभागं मंत्रं तमस्तलक्षणं प्रथमे दिवसे मासे वर्षे गृह्णाति बालकं योगिनी मातृका नाम सर्व सत्वभयावहा छर्दिर्मूर्छाज्वरः कंपः शोफो दिनस्वभावतः अनिच्छा स्तनपाने तु तथा ग्रस्तस्य लक्षणं द्वितीये दिवसे मासे वर्षे गृह्णाति बालकं स्तनदा योगिनी नाम प्रथमं जायते ज्वरः संकोचो हस्तपादानां रागो दृशोः कुर्दनं तथा सत्रयत्नं च कक्षुस्तस्येति लक्षणं तृतीये दिवसे मासे वर्षे गृह्णाति बालकं पूतना योगिनी नाम मेनो गात्रभंगो ज्वरो रुचिः प्रलापः कंपशोषश्च छर्दिरित्यादि लक्षणं अत्र पराङ्के च वारुण्यां पंचरात्रं बलिं क्षिपेत् चतुर्थे दिवसे मासे वर्षे गृह्णाति बालकं भीषणास्या महारौद्रा योगिनी मुखमंडना तया गृहीतमात्रस्य प्रथमं जायते ज्वरः ॥ कासश्वासो रुचिर्गात्रभंगो दुर्बलता गतिः दक्षिणस्यां दिशि मांसपूर्ण च बलिं दद्यात् पंचमे दिवसे दिवसे मासे वर्षे गृह्णाति बालकं विडाली नाम तद्ग्रस्ते च दृक्पीडा ज्वरो रुचिः हस्तपादादि संकोचं वक्षःपीडा च लक्षणं पंचरात्रं बलिं तस्यै वारुण्यां दिशि निक्षिपेत् सप्तमे दिवसे मासे वर्षे गृह्णाति बालकं शुष्का निश्वासरोधनं रोमो ज्वरः कंपादि लक्षणं ॥ पश्चिमां दिशमाश्रित्य पंचरात्रिं बलिं हरेत् अष्टमे दिवसे मासे वर्षे गृह्णाति जंभला तया गृहीतमात्रस्य प्रथमं जायते ज्वरः शिरः पीडा शिरोरोगश्च क्रंदनोद्भूट तो निःश्वासः दक्षिणां दिशमाश्रित्य बलिं दद्यात् प्रकल्पयेत् नवमे दिवसे मासे वर्षे गृह्णाति बालकं अजिता योगिनी नाम गात्रभंगो ज्वरोद्दिरुक् छर्दिश्च तापश्चैवादि तद्गृहीतस्य लक्ष

५

णं उत्तरां दिशमाश्रित्य पंचरात्रं बलिं क्षिपेत् दशमे दिवसे वर्षे गृह्णाति बालकं रोदनं कंपनं छर्दिर्ज्वरो दुर्वर्णो रुचिरुक् पूर्वां दिशमाश्रित्य पंचरात्रं बलिं क्षिपेत् एकादशे दिने मासे वर्षे गृह्णाति बालकं कोटरा योगिनी नाम रोदनं वेदना ज्वरः गात्रकंपो ज्वरो श्वेव तस्य गृहीतस्य लक्षणं पंचरात्रं मांसभक्तं बलिं हरेत् भानुसंख्ये दिने मासे वर्षे गृह्णाति बालकं रेवती योगिनी नाम ज्वरः कंपो तिवेदना निद्राक्षीणः स्वरः पीतो वमिराहारश्रमता उत्तरां दिशमाश्रित्य सप्तरात्रं बलिं हरेत् पुरंदरदिने मासे वर्षे गृह्णाति योगिनी बलं सर्वमुखी नाम श्वासकास ज्वरो रोरुचिः तद्युक्ते चिकित्सा माश्रित्य दक्षिणस्यां बलिं हरेत् विश्वाख्ये दिवसे मासे वर्षे गृह्णाति योगिनी कुमार नयनोद्वेगो ज्वरत्रोषादि लक्षणं निरृतिं दिशमाश्रित्य सप्तरात्रं बलिं क्षिपेत् बालकं स्नापयेत् तस्य क्वांति तोयेन मंत्रवित् नदीतीरद्वयाक्रांता मृदा देवी स्वरूपकं कृत्वा पूजां च कर्तव्या पुष्पधूपादिभिस्ततः॥ वटका जंबुका पूपा अग्रमत्स्यी गुडो दधि चतुर्वर्णपताकाश्च प्रदीपाः पुष्पचंदने॥ पूजयं सर्वदेविनां भपराक्के तथाविधि। सर्वत्र नाम भेदेन बलिदानं प्रयोजयेत् ॐ नमो भगवते वासुदेवाय॥ नमो भगवति अमुकी देवि बालं मुंच मुंच बलिं गृहाण स्वाहा ॥इति सर्वत्र बलिदानमंत्रः॥ इति रसमंजरी तंत्रे वीर्यस्तंभनादि बालग्रहणं तं नवमोऽध्यायः॥ ९॥ अथ कालस्य विज्ञानं प्रवक्ष्यामि यथाश्रुतं जीवनं मरणं चैव यतो जानाति निश्चयं कालग्रहस्य यस्येदं दंष्ट्रा समुदितं जगत् अथ वाथ प्रभाते वा अकस्मं

च पिष्यति रसरसायनं योगं कालं ज्ञात्वा समाचरेत् तस्माज्जाते वृथा सर्वं क्लेशाय चावतिष्ठते कृतो रक्त
कषायकृष्णवसनो दंडी जटी मुंडी तस्तैलाभ्यक्तशरीरो रज्जुकरकोटीनोऽश्रुपूर्णाननः भस्मांगारकपाल
पांशुतुषालिप्तसर्वांगो महाकुलो यः श्वसनःस्वरसंस्थितो गदन्मृतो कालानलःस्मार्त्तो॥ इति दूतलक्ष॥
अकस्माद्विकृतिरकस्मात्पुरुषोत्तमः अकस्मादिंद्रियोत्पत्तिं सन्निपातसलक्षणं शरीरं शीतलं य
स्य प्रकृतिविकृतिर्भवेत् तत्रारिष्टसमासेन वक्ष्यं तन्निबोधमे दुष्टशब्देषु रमते श्लक्ष्णशब्देषु कुष्यति य
श्चाकस्मान्न शृणोति गतायुश्चैव लक्षयेत् मत्वा गंधं न गृह्णाति दीपे न्यांते नुमानवः दिवाज्योतिं यः पश्या
पि ज्वलितान्येव पश्यति तडिद्वातःस्थितान्वापि निर्मले गगने घनात् विना विमानप्रासादैः यश्च संकु
लमंबरं विपरीते न गृह्णाति मानवानां नमृत्युदः धूमनीहारवासोभिः रावृतामिव मेदिनी प्रदीप्तमिव लो
कं च यः संप्लुतमिवांभसि भूमिमष्टापदाकानां लेखाभिर्यो न पश्यति ज्योत्स्नादर्शाक्षितोयेषु छायां
यश्च न पश्यति पश्यत्येकांगहीनां वा विकृतां वान्यसत्वजां श्वकाककंकगृध्राणां प्रेतानां यक्षरक्षसां॥
पिशाचोरगनागानां भूतानां विकृताननां कीशमीनस्य तस्तस्य यातस्मृतिमतस्तथा। अकस्माज्जंनतो
यस्तु स परासुरसंशयं यस्याधरोष्टं पतति क्षतश्चोर्ध्वं तथोत्तरं उभौ वाजम्बचापि कालौ दुर्लभं तस्य जीवि
तं कुटिला स्फुरिता वाचाप्यक्षिणी यस्य तु नासिका भुग्ना विस्फुरिते वापि स परासुरसंशयं धारविंदुयदाकस्मा

रसमज०

सततेभुविनीगतः सद्यापाजायते मृत्युः कालः कालेनकथ्यते वर्णहीनंयदात्मानं पश्यत्यलकथंचनः नचासौजीवते लोके कालेनैवावलोदितः रात्रौदाहोभवेद्यस्यदिवाशीतंचजायते कफश्चरितकंठस्य उष्णभं तस्यजीवनं चरणौशीतलौयस्य शीतलंनाभिमंडलं शिरस्तापोभवेद्यस्यमृत्युतस्यनसंशयः ॥ फूंकार ःशीतलंयस्यफेत्कारोवह्निसंनिभः ॥ महादाहोभवेद्यस्यतस्यमृत्युर्नसंशयः ॥ योवाविष्णुपदत्रयंसुर ... पदं यंमातृकामंडलं तारापुंजमरुंधती ममृतगौः शुक्रं ध्रुवंजोठनं मेतेषेकमपिस्फुटंमपुरुषः पश्यंपुरःशोषितः सोवर्षं किरातिहकालवदनेसंवत्सरादूर्ध्वतः अरश्मिमिवसूर्यस्यवह्निशीतांशुमा लिनः दृष्ट्वैवदशमासात्पुरुषोर्ध्वनजीवति वापुंपुरीषंमूत्रंयः सुवर्णंरजतंतथा प्रत्यक्षमथवास्व प्नेदशमासंनजीवति स्थूलांगोपिकृशोःकृशोपिसहसास्थूलत्वमालंबते स्यामोवाकनकप्रभोयदिभ वेत्कृशोपिगौरछविः स्थूलोभीरुरधीरधर्मनिपुणःशांतोविकारीपुमानित्येवंप्रकृतेरुशांतिचलनं मासाष्टमेमृत्यदं ॥ पीडाभवेत्पाणितलेचजिह्वामूलंरुधिरंचकृष्णं दृष्ट्वाविनरोग्लानिमतियत्रदृष्ट्वाजी वेन्नतुष्यसहितसप्तमासं मध्यास्तनीलत्रितयेनवक्त्रे रोगंविनाशुष्यतियस्यकंठः मुहुर्मुहुःप्रश्रवणेच जाड्यंषड्भिःसमासैः शलयंप्रयातीयस्यनस्फुरतेकिंचिद्विधतेस्तमसमर्थाणि सोनस्यपंचमेमासिस्कं धारुढोगमिष्यति यस्यनस्फुरतेज्योतिः पीड्यतेनयनद्वये मरणंतस्यनिर्दिष्टंचतुर्थेमासिनिश्चितं स्पष्टं

॥३॥

रि

सम

तेवषर्णोयस्यनकिंचिदपिपीडितो तृतीयेमासिसोवश्यंयमलोकंगमिष्यति ताराद्विवाचलस्योनिपातयोविद्युतंपश्य
तिस्वेनिरभ्रे इंद्रद्वयंपश्यतियश्चस्वर्यं मासद्वयंतस्यनवंतिनाग्रं यस्ययोनुतं मर्म्मनकिंचिदपिचेष्टितं मासांतेमर
णंतस्यकेनापिनविलंब्यते कनिष्ठांगुलिपर्वाणि कृष्णास्यात्मंप्रसंपदा तदाशु: प्रोच्यतेपुंसामष्टादशदिनावधि ४
तेतेतेजतेनापिदर्प्पणेयस्तुपश्यति शिरोहीनमथात्मानंपश्यमे [illegible] कंसजीवति स्नानमात्रस्ययस्यैते त्रयः शुष्यं
ति तत्क्षणात् हृदयं हस्तपादौच दशरात्रंसजीवति स्वरूपंपरनेत्रस्य पुत्रिकायांनपश्यति यदास्वेच्छानहृदिःस्या
स्तदामृत्युर्नसंशयः॥ इतिकालज्ञानं॥ अथातःसंप्रवक्ष्यामिछायापुरुषलक्षणं यस्यविज्ञानमात्रेणत्रिकालज्ञ
ोभवेन्नरः कालोदूरस्थितोवापि येनोपायेनलक्षयेत् तंवदामिसमासेनयथोदिष्टंशिवाज्ञया एकांतंविजनंगत्वा
कृत्वादित्यंचपृष्ठतः निरीक्षेतनिजछायां कंठदेशेसमाहितः ततःश्वाकाशमीक्षेत ततःपश्येत्सशंकरं॥ ओं ह्रीं
परब्रह्मणेनमः १०८ जपेत्॥ अष्टोत्तरशतंजप्त्वा ततःपश्यतिवैस्वयं॥ शुद्धस्फटिकसंकाशं नानारूपधरंप्रभुं
षण्मासाभ्यासयोगेन भूचराणांपतिर्भवेत् वर्षद्वयेनहेनाथ कर्ताहर्तास्वयंप्रभुः त्रिकालज्ञानमाप्नोतिकर्ता
हर्ताचजायते संततोऽभ्यासयोगेन नास्तिकिंचित्सुदुर्लभं तद्रूपंकृष्णवर्णंयः पश्यतिव्योम्निसंस्थितं षण्मासान
मृत्युमाप्नोति सत्यंसत्यंसंशिवोदितं पीतेव्याधिभयंरक्ते नीलेहत्यांविनिर्दिशेत् नानावर्णस्वरूपेस्मिन्महोद्वेगोजायते
महान् पादेगुल्फेचजठरेविनाशःक्रमशोभवेत् अर्द्धवर्षेणवर्षेण क्रमाद्वर्षद्वयेनच॥ विनासेदक्षिणेबाहौ

स्ववंधुर्म्रियते ध्रुवं वामे बाहौ निजा भार्या विनश्यति न संशयः उरः शिरोदर्शनाभावे विनाशो मृत्युमादिशेत् अशिरो
मासि मरणं विना जंघादिना ष्टकं अष्टभिः स्कंधनाशेन छायालोपेन तत्क्षणात् इति छायापुरुषलक्षणं॥
तीर्थस्नानेन दानेन तपसा नियमेन च जपेन ध्यानयोगेन जायते कालवंचनं॥ रक्षणीयस्ततो देहो यतो धर्मादि
साधनं॥ शरीरं नाशयंत्येते दोषधातुमलाश्रयं श्रमाः सुखकरा ह्येमा बलतेजोविवर्द्धनं रोगा जउ त्वमाप्या
ति असाध्या यांति साध्यतां असाध्या जीवितं दंति न तेषां च प्रतिक्रियाः येषां हृदि स्फुरति शाश्वतमप्रमे
यं तेजस्तमो नाशविनाशकं हरेः तेषामखंडनशक्यंति सुपुष्पभाजां स्वप्नेपि नो भवति कालभयं नरा
णां इहभवक्रमहं वंदे पात्राकृशास्तुत्रोमितं कामरूपं मदोन्मत्तं विद्यापात्रार्कं तमं वैद्यनाथस्य पुत्रेण शा
लिनाथेन धीमता शास्त्रमालोक्य सुधिया रचिता रसमंजरी॥ श्रीमत्पंडितविद्यनाथतनयः श्रीशालि
नाथः सुधी विद्यावेदविनोदवैद्यकसुधासिंधूरुदीतोदियः श्रीमान्सारसक्रियाविमलधीरुद्धदपादान
धीरेतत् श्रीरसमंजरीकविमलं ग्रंथं चकार स्वयं॥ इति वैद्यनाथः॥ पोथिसेवारामजीकी छै ईदोरमलिषोईछै०
पत्रसंख्या ३१॥

॥३१॥

नि